# संस्कृत-वार्ता:

दिनाङ्क : 06/11/2025 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- बिहारविधानसभानिर्वाचनस्य प्रथमे चरणे अष्टादश जनपदेषु एकविंशत्यधिकैकशतासनेषु मातदानं सम्पन्नम्। सायं पंचवादनं पर्यन्तषष्ठि प्रतिशतं यावत् मतदानम् अभिलिखितम्।
- बिहार निर्वाचनस्य द्वितीयस्य चरणस्य प्रचारः गतिम् अवाप्नोत्। एन्. डी. ए. तथा महाघटबन्धन् इत्येतयोः नेतारः स्वियप्रत्याशिनां समर्थने प्रचारे संलग्नाः सन्ति।
- इज़राइल-देशस्य रक्षामन्त्रिणा इज़राइल् काट्ज़ इत्यनेन प्रोक्तं यत् सेना हमास-आतङ्कवादिनां निर्मूलनं निरन्तरं करिष्यति ।
- फिलिपीन्स-देशस्य राष्ट्रपतिना फर्डिनांड मार्कोस जूनियर इत्यनेन अद्य कालमेगी-नामक चक्रवातेन चतुर्दशाधिकैकशतं यावत् जनानां मृत्यो: अनन्तरं, आपत्कालस्य घोषणा कृता।
- पुरुष-क्रिकेट्-क्रीडायाम् अद्य क्वीन्सलैण्ड-नगरस्य कैरारा ओवल्-नगरे चतसृणां विंशति प्रति विंशति अन्ताराष्ट्रिय-क्रीडा- स्पर्धायां आतिथेय-आस्ट्रेलिया-दलं भारतेन अष्टचत्वारिंशत् धावनान्कैः पराजितम्।

---------------------------------------------

<u>बिहारविधानसभा</u>

बिहारविधानसभानिर्वाचनस्य प्रथमे चरणे अष्टादश जनपदेषु एकविंशत्यधिकैकशतासनेषु मातदानं सम्पन्नम्। सायं पंचवादनं पर्यन्तषष्ठि प्रतिशतं यावत् मतदानम् अभिलिखितम्। बेगुसराय् जनपदे सर्वाधिकं नवपञ्चाशत दशमलव द्वयशीतिः प्रतिशतं मतदानम् अभवत्। बिहारस्य मुख्यमन्त्री जे. डी. (यू) दलस्य अध्यक्षः नितीशकुमारः, भाजपा-नेता तथा उपमुख्यमन्त्री सम्राट् चौधरी, भाजपा-नेता तथा केन्द्रीय-गृह-राज्यमन्त्री नित्यानन्द-रायः, लोकजनशक्ति-दलस्य प्रमुखः चिराग पासवानः , वि.आई. पि- दलप्रमुखः तथा महाघटबन्धनस्य उप-मुख्यमन्त्रीपदस्य प्रत्याशि मुकेश साहनी च मतदातृ-नेतृषु अन्यतमाः आसन्। पटना,

वैशाली, नालन्दा, भोजपुर, मुङ्गेर, सारण, सिवान, बेगुसराय, लखीसराय, गोपालगञ्ज, मुज़फ़्फ़रपुर, दरभंगा, माधेपुरा, सहरसा इत्येतेषु जनपदेषु मतदानं सम्पन्नम्। मतदानं प्रातः सप्तवादनादारभ्य सायं षड्वादनं यावत् प्राचलितम्। तत्रैव सुरक्षाकारणात् सिमरी बख्तियारपुर, महिषि, तारापुर, मुङ्गेर, जमालपुर, सूर्यगढ़ा विधानसभाक्षेत्रेषु षड्पञ्चाशत् मतदानकेन्द्रेषु मतदानं सायं पञ्च वादनं यावत् अभवत्। स्वतन्त्रं, निष्पक्षं, शान्तियुतं च मतदानं निश्चेतुं विस्तृतसुरक्षाव्यवस्थापि कृता: सन्ति।

---------------------------------------------

<u>बिहार प्रचार</u>

बिहार-राज्यस्य मुख्य-निर्वाचन-अधिकारिणा अद्य बिहार-विधानसभा-निर्वाचनस्य प्रथम-चरणस्य समये कतिपयेषु मतदानकेन्द्रेषु आर्. जे. डि. इति राष्ट्रिय-जनता-दलेन कृत स्वेच्छया विद्युत्-विच्छेदनस्य आरोपान् निराकृतम्। मुख्य-निर्वाचन-अधिकारिणा अरोपान् पूर्णतया निराधारम्, भ्रमात्मकं च उक्तम्। एतदतिरिच्य, निर्वाचनस्य द्वितीयस्य चरणस्य प्रचारः गतिम् अवाप्नोत्। एन्. डी. ए. तथा महाघटबन्धन् इत्येतयोः नेतारः स्वियाभ्यर्थिनां समर्थने प्रचारे संलग्नाः सन्ति। बिहारस्य अररियायां जनसभां सम्बोधयन् वरिष्ठः भाजपा-नेता तथा प्रधानमन्त्री नरेन्द्रमोदी अद्य आर्. जे. डी.-दलस्य कार्यकाले बिहारराज्ये अराजकता, विकासस्य अभावः च आसीत् इति आरोपितवान्।

पश्चात् प्रधानमन्त्री भागलपुरनगरे एकाम् अन्यत् जनसभाम् अपि सम्बोधितवान्। केन्द्रीयमन्त्री अमितशाहः अद्य पश्चिमी-चम्पारण्, पूर्वी-चम्पारण्, मधुबनी इत्येतेषु मण्डलेषु प्रचाराभियाने भविष्यति, रक्षामन्त्रीः राजनाथसिंहः चापि पूर्वी-चम्पारण्, सीतामढी इत्येतयोः मण्डलयोः भविष्यति। महाघटबन्धन् इत्यस्य मुख्यमन्त्रीपदस्य प्रत्याशी तेजस्वी प्रसाद यादवः अद्य मधुबनी, सुपौल्, किशनगञ्ज्, कटिहार, पूर्णिया इत्येतेषु मण्डलेषु अष्टादश-निर्वाचनसमारोहेषु सम्बोधयिष्यति।

---------------------------------------------

<u>प्रधानमन्त्री-वाराणसी</u>

प्रधानमन्त्री नरेन्द्रमोदी शनिवासरे वाराणसी-नगरे चत्वारि नूतनानि वंदेभारत् एक्स्प्रेस्-रेलयानानि हरितध्वजं प्रदर्शयिष्यति। नूतनानि वंदेभारत् एक्स्प्रेस्-रेलयानानि बनारस-खजुराहो, लखनऊ-सहारनपुर, फिरोजपुर-दिल्ली, एर्नाकुलम्-बेङ्गळूरु-मार्गेषु च प्रचलिष्यन्ति। एतानि रेलयानानि यात्रा-समयं न्यूनीकर्तुं, क्षेत्रीय-गतिशीलतां वर्धयितुं, पर्यटनं प्रोत्साहयितुं, सम्पूर्णे देशे आर्थिकगतिविधयः च संवर्धयिष्यन्ति। श्रीमोदी तस्मिन् एव दिने नवदिल्ल्यां विधि-सहायता-वितरण-तन्त्रं सुदृढीकरण विषये राष्ट्रिय-सम्मेलनस्य उद्घाटनम् अपि करिष्यति। एकस्य वक्तव्यस्य अनुसारं, प्रधानमन्त्री राष्ट्रिय-विधि-सेवा-प्राधिकरणेन निर्मितस्य समुदाय-मध्यस्थता-प्रशिक्षण-माड्यूल् इत्यस्य आरम्भः करिष्यति, तत्र सभामपि सम्बोधयिष्यति।

---------------------------------------------

## उपराष्ट्रपतिः

उपराष्ट्रपतिः तथा राज्यसभायाः सभापतिः सी. पी. राधाकृष्णन् वर्यः अद्य सत्-पाल्-शर्मा इत्यस्मै शपथ ग्रहणं कारितवान्। श्रीशर्मा संसदः उच्चसदनस्य निर्वाचितसदस्यः अस्ति। सः जम्मू-कश्मीरस्य भारतीय-जनता-पार्टीति दलस्य सदस्यः अस्ति। शपथग्रहणसमारोहे केन्द्रीयमन्त्री जे. पी. नड्डाः, डा. जितेन्द्रसिंहः च उपस्थितौ आस्ताम्।

---------------------------------------------

## राष्ट्रपति महिला-क्रिकेट्

पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य आई. सी. सी. महिला-क्रिकेट्-विश्वचषक विजेतृ-भारतीय-महिला-क्रिकेट्-दलस्य सदस्याः अद्य नवदिल्ल्याः राष्ट्रपतिभवने राष्ट्रपतिना द्रौपदी-मुर्मु वर्यया सह मिलितवन्तः। सामाजिक-अन्तर्जालीय-सन्देशे राष्ट्रपतिः मुर्मुः दलं अभिनन्दितवती।

---------------------------------------------

## प्रधानमन्त्री महिला- क्रिकेट्

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः लोक-कल्याण-मार्गे स्वीय निवासस्थाने महिला-विश्वचषक-विजेतॄणाम् आतिथ्यं कृतम्। श्रीमोदी, महिला-क्रिकेट्-दलस्य विजयाय अभिनन्दनं कृत्वा, तिसृषु स्पर्धासु पराजयानन्तरं प्रतियोगितायां तासां उल्लेखनीयस्य पुनरागमनस्य प्रशंसाम् अकरोत्।

प्रधानमन्त्री क्रीडकान् निवेदितवान् यत् ते मुख्यतया बालिकानां कृते, फिट् इण्डिया इत्यस्य सन्देशम् अग्रे नयन्तु इति। मेलने दलनायिका हरमन्प्रीत् कौर इत्येषा सप्तदशाधिक-द्विसहस्रतमवर्षे प्रधानमन्त्रिणा सह मेलनस्य स्मरणं कृतवती, यदा तौ चषकं विनैव मिलितवन्तौ।

दीप्तिशर्मा इत्येषा सप्तदशाधिक द्विसहस्रतमवर्षे प्रधानमन्त्रिणा नरेन्द्रमोदिना सह मिलितवती तदा प्रधानमन्त्रिणा परिश्रमाय उक्तम् आसीत्।

---------------------------------------------

## इज़राइल- हमास

इज़राइल-देशस्य रक्षामन्त्रिणा इज़राइल् काट्ज़ इत्यनेन प्रोक्तं यत् सेना हमास-आतङ्कवादिनां निर्मूलनं निरन्तरं करिष्यति । गाज़ा-प्रदेशस्य इज़राइल्-नियन्त्रित-क्षेत्रेषु तेषां सुरङ्गानां विनाशं च करिष्यति इति। एतत् वक्तव्यं तदा आगतं यदा अमेरिका देशः अकथयत् यत् राफ़ा-नगरे अवरुद्धेभ्यः हमास-आतङ्कवादिभ्यः गाज़ा-पट्टिकायाः तेषु भागेषु प्रत्यागन्तुम् अनुमतिः भवेत् ये अद्यापि तेषां नियन्त्रणे सन्ति । काट्ज़ इत्यसौ अवदत् यत्, इज़राइल्-देशस्य उद्देश्यम् अस्ति यत्-हमास-संस्थायाः निरस्त्रीकरणम्, गाज़ा-प्रदेशं असैन्यीकरणम्, अपि च बन्धकशवानां पुनःप्राप्तिः इति।

---------------------------------------------

## फिलिपीन्स- आपत्कालस्य

फिलिपीन्स-देशस्य राष्ट्रपतिना फर्डिनांड मार्कोस जूनियर इत्यनेन अद्य आपत्कालस्य घोषणा कृता। अस्मिन् वर्षे देशस्य निकृष्टतमः प्राकृतिकः प्रकोपः - कालमेगी-नामक चक्रवातः - मध्य-प्रान्तेषु उत्पन्नः, यस्मिन् न्यूनातिन्यूनं चतुर्दशाधिकैकशतं यावत् जनाः मृताः, शतशः जनाः च लुप्ताः। अधिकांश-जनाः आकस्मिक-जलप्लावनेन निमग्नाः अभवन्। सप्तविंशत्यधि एकशतं जनाः अद्यापि लुप्ताः सन्ति, तेषु बहवः सेबू-नामकस्य मध्य-प्रान्तस्य तीव्रतया प्रभावितप्रदेशेभ्यः सन्ति।

---------------------------------------------

**क्रिकेट्**

पुरुष-क्रिकेट्-क्रीडायाम् अद्य क्वीन्सलैण्ड-नगरस्य कैरारा ओवल्-नगरे चतसृणां विंशति प्रति विंशति अन्ताराष्ट्रिय-क्रीडा- स्पर्धायां आतिथेय-आस्ट्रेलिया-दलं भारतेन अष्टचत्वारिंशत् धावनान्कैः पराजितम्। अनेन विजयेन, भारतीय दलं पञ्चसु स्पर्धासु श्रृङ्खलायां द्वि एकम् अङ्कैः अग्रे अभवत्।

।। इति वार्ताः ।।